In Public domain. Digitization Muthulakshmi Research Academy

इदं गीताशास्त्रं परमपुरुषार्थैकसदनं
त्रिकाण्डं वेदार्थं सकलमिह संगृह्य कथितम् ।
स्वयं श्रीकृष्णेन श्रुतिविशदतत्त्वेन विभुना
जपाद्ध्यानाज्ज्ञानाच्छ्रुतमपि फलत्येव सुधियाम् ॥

रताः केचिद्योगे विजितकरणाः संयतधियः
क्रियाजाले केचिच्छ्रुतिलवसुखास्वादनपराः ।
रताः शास्त्राभ्यासे विशदमतयः केचिदजडा
वयं तु श्रीकान्ताननवचनमास्वाद्य कृतिनः ॥

इति ।

प्रपन्नपारिजाताय तोत्रवेत्रैकपाणये ।
ज्ञानमुद्राय कृष्णाय गीतामृतदुहे नमः ॥

(66)

APPAYYA DIKSITA'S SIVADHYANAPADDHATI

EDITED BY

Vidyāsāgara Vidyāvācaspati Bhāratakalānidhi,

P. P. SUBRAHMANYA SASTRI, B.A. (Oxon) M.A. (Madras)

Professor of Sanskrit and Comparative Philology

Presidency College, Madras.

INTRODUCTION

Śrīmān Appayya Dikṣita is well known to the world of scholars by his numerous works in all branches of Sanskrit Literature. He was a great devotee of Śiva and has left us several works on the daily ritual and worship of Śiva. Of these, four works deserve special mention—शिवपूजाविधिः, शिवपूजापद्धतिः, शिवार्चनाचन्द्रिका and शिवध्यानपद्धतिः. All these four are independent works, though on identical topics with slight variations in treatment.

Śivārcanācandrikā was published in 1922 by the Śivāgama Siddhānta Paripālana Sangam, Devakottai. Śivapūjāpaddhati is available in manuscript only in the Travancore University Oriental Manuscripts Library. A copy of the Śivapūjāvidhi which is different from the previous work is available in manuscript in the Government Oriental Manuscripts Library, Madras. Śivadhyānapaddhati, deposited in the Tanjore Mahārāja Serfoji Sarasvati Mahal Library is now published for the first time. Though the text* is corrupt, libertics have not been taken with it, for want of a second manuscript.

In Public domain. Digitization Muthulakshmi Research Academy

श्रीः

श्रीभरद्वाजजलधिकौस्तुभश्रीमदप्पय्यदीक्षितविरचित-

॥ शिवध्यानपद्धतिः ॥

॥ ओम् ॥

मध्येहृदयपाथोजं महादेवासनोचितम् ।
महिताकारशोभाढ्यं मण्डपं परिचिन्तयेत् ॥ १ ॥

अतिचिन्तामणिप्रख्यैरतिकौस्तुभकान्तिभिः ।
रत्नैरप्राकृतैर्लोकं रञ्जयन्तं समन्ततः ॥ २ ॥

दक्षिणद्वारपार्श्वस्थं संस्मरेन्नन्दिकेश्वरम् ।
अनेकरुद्रप्रमथभूतसङ्घैर्निषेवितम् ॥ ३ ॥

शिवधर्ममहाध्यक्षं शिवान्तःपुरपालकम् ।
चामीकराचलप्रख्यं सर्वाभरणभूषितम् ॥ ४ ॥

बालेन्दुमकुटं सौम्यं चतुर्बाहुं त्रिलोचनम् ।
दीप्तशूलमृगीटङ्कहेमवेत्रधरं विभुम् ॥ ५ ॥

चन्द्रबिम्बाभवदनं हरिवक्त्रमथापि च ।
उत्तारद्वारपार्श्वे तु तप्ततीमरतां(?) सुताम् ॥ ६ ॥

सुयशां सुव्रतामम्बां पादमण्डनतत्पराम् ।
सहितां रुद्रकन्याभिः सखीभिश्चाप्यनेकशः ॥ ७ ॥

मध्येऽथ मण्डपस्यास्य वेदिकां विमलप्रभाम् ।
चतुःस्तम्भयुतां ध्यायेच्चतुरश्रां मनोहराम् ॥ ८ ॥

तस्यां शक्त्यादि शक्त्यन्तं तन्वीत परमासनम् ।
आधारशक्तिं शामाङ्गीं पादोद्धृत(?)वराभयाम् ॥ ९ ॥

तस्याः पुरस्तादुत्कण्ठमनन्तं कुण्डलाकृतिम् ।
तस्योपरि शुभं ध्यायेत्सिंहासनमुमापतेः ॥ १० ॥

धर्मो ज्ञानं तु वैराग्यमैश्वर्यं च तदङ्घ्रयः ।
आग्नेयादिस्थिताः श्वेतपीतरक्तहरिप्रभाः ॥ ११ ॥

सिंहाकारा(?) सिंहकोट्यः प्रत्येकं परिवारिताः ।
अधर्मादिनपूर्वादिफलकादिसमन्ततः ॥ १२ ॥

राजावर्तप्रकाशानि नराकारधराणि च ।
मध्यकं फलकं तस्य साक्षाल्लक्ष्मीपतिः स्वयम् ॥ १३ ॥

तस्मिन्प्राकादिमध्यस्थप्रणवादिस्वराष्टकम् ।
योगासनं विभोर्ध्यायेत्कूर्माकृत्यनलप्रभम् ॥ १४ ॥

तस्योर्ध्वेऽच्छदलं पद्ममासनं विपुलं स्मरेत् ।
शिवधर्ममहाकन्दशिवज्ञानैकनालकम् ॥ १५ ॥

अष्टैश्वर्यदलोपेतं पूर्वादिपरितः क्रमात् ।
अष्टवामादिशक्त्यन्तं रुद्रकल्पितकेसरम् ॥ १६ ॥

वैराग्यकर्णिकं शुभ्रं वामादिनवबीजकम् ।
वामा ज्येष्ठा तथा रौद्री काली विकरिणी तथा ॥ १७ ॥

बालपूर्वा विकरिणी बालप्रमहिनी(?) तथा ।
अष्टावेताः सर्वभूता दमन्या सह शक्तयः ॥ १८ ॥

केसरेषु स्थिता ध्येया रक्ताभा प्रुत(?)चामराः ।
कलाधरकलाद्योतकर्णिकायां मनोन्मनि ॥ १९ ॥

स्मर्तव्येशानदिग्भागे पाशाङ्कुशवराभया ।
पद्मासनस्थितं ध्यायेद्देवस्य विमलासनम् ॥ २० ॥

गणाम्बिका महादेवी तनो गौरी प्रचोदयात् ।
क्रान्तं शक्तिभिरेताभिस्सौम्यादिविमलासनम् ॥ २१ ॥

तस्योपरि गणानां च मण्डलानां च साधकम् ।
तत्त्वानामपि मूर्तीनां त्रितयानि विभावयेत् ॥ २२ ॥

सर्वासनोपरि सुखं विचित्रकुसुमास्तृतम् ।
परव्योमावकाशाख्यमासनं कल्पयेद्विभोः ॥ २३ ॥

तस्मिन्सदाशिवं ध्यायेद्दुग्धपद्मासनस्थितम् ।
शुद्धस्फटिकसङ्काशं प्रसन्नं शीतलद्युतिम् ॥ २४ ॥

विद्युद्वलयविद्योतजटामकुटमण्डितम् ।
शार्दूलचर्मवसनं मन्दस्मितमुखाम्बुजम् ॥ २५ ॥

In Public domain. Digitization Muthulakshmi Research Academy

रक्तपद्मदलप्रख्यपाणिपादतलाधरम् ।
द्वात्रिंशल्लक्षणोपेतं सर्वाभरणभूषितम् ॥ २६ ॥

दिव्यगन्धानुलिप्ताङ्गं दिव्यमाल्यैरलङ्कृतम् ।
पञ्चवक्त्रं दशभुजं प्रतिवक्त्रं त्रिलोचनम् ॥ २७ ॥

दक्षिणे शूलवज्रासिपरश्वभयमुद्रिकाः ।
वामे च दधतं नागपाशघण्टानलाङ्कुशम् ॥ २८ ॥

अस्योर्ध्वं वक्त्रविलसद्बालचन्द्रकलाधरम् ।
ध्यानस्थमूर्ध्वाभिमुखं गगनच्छाययासितम् ॥ २९ ॥

पूर्ववक्त्रं महेशस्य छायया कनकप्रभम् ।
बालेन्दुशेखरं सौम्यं संप्राप्तं नवयौवनम् ॥ ३० ॥

दक्षिणं वदनं कालच्छायाञ्जनसमप्रभम् ।
भ्रुकुटीकुटिलं घोरं रक्तवृत्तेक्षणत्रयम् ॥ ३१ ॥

दंष्ट्राकरालदुर्धर्षस्फुरिताधरपल्लवम् ।
चन्द्रापीडज्वलत्केशं किञ्चिच्चलितयौवनम् ॥ ३२ ॥

उत्तरं यक्षराजस्य छायया विद्रुमप्रभम् ।
ललाटतिलकोपेतं नीलालकविभूषितम् ॥ ३३ ॥

सविलासं त्रिनयनं चन्द्राभरणभास्वरम् ।
अङ्गनाकृतिबिम्बोकसलीलभ्रूलतान्वितम् ॥ ३४ ॥

पश्चिमं पाशहस्तस्य छायया चन्द्रसन्निभम् ।
चन्द्रोत्तंसनृपाकारं कृतभस्मावकुण्ठनम् ॥ ३५ ॥

इति ध्यात्वा पुनरपि ध्यायेद्देवं सदाशिवम् ।
इच्छाज्ञानक्रियारूपं विलसल्लोचनत्रयम् ॥ ३६ ॥

ज्ञानचन्द्रकलाचूडं दशदिग्बाहुमण्डितम् ।
त्रैगुण्यादिमयैः कान्तं दिव्यैर्दशभिरायुधैः ॥ ३७ ॥

सर्वायुधान्वितं सिद्धं हृदयादिषडङ्गकम् ।
सद्योजातादिवपुषा पञ्चसादाख्यवक्त्रकम् ॥ ३८ ॥

श्रीमत्पञ्चाक्षुरमयं प्रणवाकारशालिनम् ।
समस्ततन्त्ररूपं च वर्णब्रह्मकलामयम् ॥ ३९ ॥

निवृत्याजानुपर्यन्तमानाभेश्च प्रतिष्ठया ।
आकण्ठं विद्यया सिद्धमाललाटं तु शान्तया ॥ ४० ॥

तदूर्ध्वं शान्त्यतीताख्यं कलया परिकीर्तितम् ।
एवं पञ्चकलारूपमिदं सादाशिवं वपुः ॥ ४१ ॥

चतुर्मुखी तटिद्वर्णा निवृत्तिर्वज्रधारिणी ।
एकवक्त्रा शशाङ्काभा प्रतिष्ठा पद्मधारिणी ॥ ४२ ॥

अग्निवर्णा त्रिवदना विद्याशक्तिलसत्करा ।
कृष्णवर्णा चतुर्वक्त्रा शान्तिर्ध्वजविधारिणी ॥ ४३ ॥

पाशधृक् पञ्चवदना शान्त्यतीता शशिप्रभा ।
सर्वाः पद्माक्षिमालाभ्यामभयेन विराजिताः ॥ ४४ ॥

चतुर्भुजा स्त्रिनेत्राश्च पीनोन्नतपयोधराः ।
आसां पञ्चाध्वगर्भत्वात् षडध्वा त इमे मताः ॥ ४५ ॥

चतुर्विंशत्युत्तरं तु भुवनानां शतद्वयम् ।
भुवनाध्वा स संचिन्त्यो रोमकूपात्मना विभोः ॥ ४६ ॥

पञ्चाशद्रुद्ररूपैस्तु वर्णैर्वर्णात्मकल्पना ।
असौ त्वगात्मना चिन्त्यो देवदेवस्य शूलिनः ॥ ४७ ॥

सप्तकोटिमहामन्त्रैर्मूलविद्यासमुद्भवैः ।
अनेकभेदसंभिन्ना मन्त्राणां पदसंहतिः ॥ ४८ ॥

पदाध्वासौ पशुपतेः सिरामांसतया मतः ।
पृथिव्यादीनि षट्त्रिंशत्तत्त्वान्यागमवेदिभिः ॥ ४९ ॥

उक्तान्यमीभिस्तत्त्वाध्वा शुक्लमज्जास्थिरूपधृक् ।
नास्य देहेऽस्थिरुधिरं न मांसं नास्ति किञ्चन ॥ ५० ॥

प्रतिबिंबमिवादर्शे शक्रचापमिवाम्बरे ।
ज्योतिर्मयतया सिद्धमिदं सादाशिवं वपुः ॥ ५१ ॥

तथापि कल्पनामालं कलाध्याध्वनामिदम् ।
ब्रह्मेशानमुखैर्देवैः पुरुषेण चतुर्मुखी ॥ ५२ ॥

हृदयादीन्यघोरेण गुह्यादीनि तु वामतः ।
सद्योजातादिमन्त्रेण पादादीनि जगत्पतेः ॥ ५३ ॥

In Public domain. Digitization Muthulakshmi Research Academy

पञ्चमन्त्रतनुः शम्भुरेवं कल्पनया भवेत् ।
ओङ्कारबीजप्रभवः कलापञ्चकसंयुतः ॥ ५४ ॥

शुद्धस्फटिकसङ्काशशुभं मेघाविवर्धनः ।
सदाशिवात्मा व्योमस्थः ईशानः परिकीर्तितः ॥ ५५ ॥

व्याहृतिप्रभवो मन्त्रः चतुष्टयकलान्वितः ।
पुरुषो हेमवर्णाभो वायुतत्त्वादिशब्दकः ॥ ५६ ॥

गायत्रीप्रभवो मन्त्रः कलाष्टकविभूषितः ।
आभिचारकरोऽत्यर्थमञ्जनाद्रिसमप्रभः ॥ ५७ ॥

अशेषाघहरं तेज(१) अघोरो रुद्रविग्रहः ।
सामवेदोद्भवो मन्त्रस्त्रयोदशकलान्वितः ॥ ५८ ॥

वामदेवः प्रवालाभो वारितत्वः स्थितो हरिः ।
यजुर्वेदोद्भवो मन्त्रः कलाष्टकयुतः स्थितः ॥ ५९ ॥

शान्तिकृत्पृथिवीसंस्थः सद्योजातः पितामहः ।
पंचवक्त्राः स्मृताः सर्वे दशदोर्दण्डभूषिताः ॥ ६० ॥

खड्गखेटधनुर्बाणकमण्डल्वक्षसूत्रिणः ।
वराभयोपेतकरः शूलपङ्कजपाणयः ॥ ६१ ॥

ओघोरोघररूपेण तदन्यः सौम्यविग्रहः ।
एवं ध्यात्वा तु देवेशं पञ्चब्रह्मात्मतां विभोः ॥ ६२ ॥

तत्तद्ब्रह्मकलाभेदैर्विच्यांङ्गानि कल्पयेत् ।
ईशानः सर्वविद्यानामित्येषा शंखपाण्डरा ॥ ६३ ॥

धूर्जटेरूर्ध्वमूर्धासौ शशिन्या सहिता कला ।
ईश्वरः सर्वभूतानामित्येषा कुन्दसन्निभः ॥ ६४ ॥

शर्वस्य पूर्वमूर्धासौ शक्त्या युक्तो गदाख्यया ।
ब्रह्माधिपतिरित्यग्रे ब्रह्मणोधिपतिस्तथा ॥ ६५ ॥

ब्रह्मेत्येषा शशाङ्काभा स्येष्टा(१) मूर्धा सदक्षिणः ।
शिवो मे अस्तिति कला शुद्धस्फटिकभास्वरा ॥ ६६ ॥

महेशस्योत्तरो मूर्धा मरीचिरथ वृद्धिका ।
सदाशिवोदितकला ज्वालाभिसहितप्रभा ॥ ६७ ॥

कलातत्पुरुषा योनिपूर्वा विदाह(१) इत्यसौ ।
शान्तियुक्ता जपावर्णा पूर्ववक्त्रं पुरद्विषः ॥ ६८ ॥

महादेवाय पूर्वाय धीमहीति कला श्रुता ।
सा विद्यासहिता कृष्णा दक्षिणं वक्त्रमीशितुः ॥ ६९ ॥

कलाप्रतिष्टासहिता तन्नो रुद्र इति श्रुतः ।
वक्त्रमुत्तरमीशस्य वर्णैः कुङ्कुमसन्निभः ॥ ७० ॥

प्रचोदयादिति कला वर्णेन स्फटिकोपमा ।
शिवस्य पश्चिमं वक्त्रं निवृत्या नित्यसंहिता ॥ ७१ ॥

अघोरेभ्यः कला नीला हृदयान्तस्तया युतः ।
अथ घोरेभ्य इत्येषा घोरा मोहा सखीगलः ॥ ७२ ॥

घोरपीतकलास्कन्धो दक्षिणः क्षुदया युतः ।
वामे रुद्रायुतो घोरतरेभ्य इति कीरिभा ॥ ७३ ॥

नीला मृत्युयुता नाभिसर्वतः शर्वरूपिणी ।
कुक्षि सर्वेभ्य इत्येषा शुभ्रा भामा यया युता ॥ ७४ ॥

नमस्ते अस्तु रुद्रेति षष्ठं रक्ताभया युता ।
वक्षोरूपेभ्य इत्येषा सजरा काञ्चनप्रभा ॥ ७५ ॥

वामदेवाय नम इति प्रभासिन्दूरसुन्दरी ।
रजया सहिता याति मालाधारा धरात्मताम् ॥ ७६ ॥

लिङ्गरक्षायुता पीता ज्येष्ठा येन मरत्प्रसौ ।
सव्योरु सारथी नीला स्याद्रुद्राय नमः कला ॥ ७७ ॥

पीता समाल्या वामोरु कालाय नम इत्यसौ ।
शुक्ला कालकला कामसहिता जानु दक्षिणम् ॥ ७८ ॥

वामा विकरणायाथ नमः शामाथ संयमा ।
सत्क्रिया दक्षिणा जङ्घा नीलाबलकला विभोः ॥ ७९ ॥

वामा विकरणायाथ मनोबुद्धियुतारुणा ।
विद्युद्वर्णा बलकला सव्यस्फिक्कार्यया युता ॥ ८० ॥

वामा प्रमथना याता नमो धात्रीयुता सिता ।
बालार्काभा सर्वभूता दमनाय नमः कला ॥ ८१ ॥

In Public domain. Digitization Muthulakshmi Research Academy

भ्रामण्यामृतलावण्या कटी कन्दर्पविद्विषः ।
सव्यपार्श्वमप्रकला नीलाभा मोहिनीयुता ॥ ८२ ॥

उल्लसत्कीरपक्षाभामुन्मनाय नमः कला ।
मनोन्मनीयुतं ध्यायेत् वामपार्श्व पिनाकिनः ॥ ८३ ॥

सद्योजातं प्रपद्यामीत्येषा बालार्कसन्निभा ।
कलासिद्धिसमायुक्ता घूर्जटेर्दक्षिणं पदम् ॥ ८४ ॥

सद्योजाताय वै सर्व्व नम इत्यसिता कला ।
ऋद्धिशक्तेः सहचरी वामं गौरीपतेः पदम् ॥ ८५ ॥

नीलाभवे कलादूत्या सहितो दक्षिणः करः ।
नीला भवेत्कलान्या तु वामो लक्ष्मीयुता कला ॥ ८६ ॥

मेघा सहचरी नासा वितानातिभवेत्कला ।
भजस्व मामिति कला सकान्तिररुणा शिरः ॥ ८७ ॥

नीला भवेत्कला बाहुः दक्षिणः स्वधया युतः ।
उद्यत्करोभासामुद्यत्याद्धवाम(?) नमः कला ॥ ८८ ॥

धृतिः शक्तियुतं ध्यायेद्वामबाहुं जगत्पतेः ।
अष्टत्रिंशत्कला देवास्त्रिनेत्राश्च चतुर्भुजाः ॥ ८९ ॥

वराभयपरश्वेण विलसत्करपङ्कजाः ।
तत्तद्ब्रह्मसमाकारवर्णायुधधृतोऽथवा ॥ ९० ॥

एतेषां वामभागेषु विरिञ्च्याः शक्तयः समाः ।
पाशाङ्कुशवराभीतिद्योतमानकराम्बुजाः ॥ ९१ ॥

श्रीकण्ठप्रमुखान् रुद्रान्वर्णरूपान् सशक्तिकान् ।
प्रभोरस्यैवं ध्यायेदुक्तन्यायवर्त्मना ॥ ९२ ॥

स्मरेयुः शक्तिकान् रुद्रानर्धनारीश्वराकृतीन् ।
सिन्दूरकान्त्यवमल्यवामदक्षिणपार्श्वकान् ॥ ९३ ॥

पाशाङ्कुशाक्षवलयवरमुद्राविराजितान् ।
प्रसन्नवक्त्रकमलान्विश्वाभिष्टप्रदायकान् ॥ ९४ ॥

कामिकं पादकमलं योगजं गुल्फयोर्युगम् ।
चिन्त्यं वादाङ्गुले रूपं कारणं प्रपदद्वयम् ॥ ९५ ॥

अजितं जानुनोर्युग्मं दीप्तमूरुद्वयं विभोः ।
गुह्यं बीजात्मकं सूक्ष्मं सहस्रं तु कटीतटम् ॥ ९६ ॥

पृष्ठभोगोपमानस्य नाभिश्रीसुप्रभेदकम् ।
विजयं जठरं प्राहुर्निश्वासं हृदयात्मकम् ॥ ९७ ॥

स्वायंभुवं स्तनद्वन्द्वमनलं लोचनत्रयम् ।
वीरागमं कण्ठदेशं रौरवं श्रवणद्वयम् ॥ ९८ ॥

मकुटं मुकुटं तन्त्रं बाहवो विमलागमम् ।
चन्द्रज्ञानमुरः शंभोर्बिम्बं वदनपङ्कजम् ॥ ९९ ॥

जिह्वा प्रोद्गीतमीशस्य ललितं गण्डयोर्युगम् ।
सिद्धं ललाटफलकं सन्तानं कुण्डलद्वयम् ॥ १०० ॥

यज्ञोपवीतं शर्वोक्तं हारस्त्रक् पारमेश्वरम् ।
किरणं रक्तभूषास्याद्वातुलं वसनात्मकम् ॥ १०१ ॥

एवं तन्त्रात्मकं रूपमीश्वरस्य विचिन्तयेत् ।
शिवज्ञानप्रदं पुंसां शिवधर्मप्रवर्तकम् ॥ १०२ ॥

प्रणवस्य च मात्राभिर्वर्णैः पञ्चाक्षरस्य च ।
पदं नासोरुयुगलं कल्पयेदंबिकापतेः ॥ १०३ ॥

विशुद्धं शिवसादाख्यं विद्युद्वृन्दमिवाम्बरे ।
विश्वतः स्फुरितज्योतिर्विद्यादूर्ध्वं मुखं विभोः ॥ १०४ ॥

अमूर्तमथ सादाख्यं मूलस्तम्भमिति श्रुतम् ।
ज्योतिःस्तम्भमयं लिङ्गं स्मरेदस्योत्तरं मुखम् ॥ १०५ ॥

ज्योतिर्लिङ्गैकभागोत्थमेकवक्त्रं त्रिलोचनम् ।
मूर्तिसादाख्यमित्युक्तं ध्यायेत्पश्चिममाननम् ॥ १०६ ॥

शूलं च परशुं वज्रमभीतिं दक्षिणैः करैः ।
पाशं वह्निं च घण्टां च वरं वामैः करैरपि ॥ १०७ ॥

दधानं कर्तृसादाख्यं चतुर्वक्त्रांबुजोज्वलम् ।
लिङ्गमध्ये समुद्भूतं स्मरेद्दक्षिणमाननम् ॥ १०८ ॥

पञ्चवक्त्रं दशभुजं पीठलिङ्गसमुद्भवम् ।
प्रसिद्धं कर्मसादाख्यं पुरारेः पूर्वमाननम् ॥ १०९ ॥

In Public domain. Digitization Muthulakshmi Research Academy

पञ्चब्रह्ममूर्ध्वपूर्वदक्षिणोत्तरपश्चिमान् ।
वक्त्रपद्मान्विभोर्ध्यायेदीशानप्रभृतीन्मुखान् ॥ ११० ॥

सर्वज्ञता तृप्तिरनादिबोधः
स्वतन्त्रता नित्यमलुप्तशक्तिः ।
अनन्तशक्तिश्च विभोर्विधिज्ञा
षडाहुरेतानि महेश्वरस्य ॥ १११ ॥

हृदयं हृदये शुभ्रं शिरः शिरसि पिङ्गलम् ।
शिखां शिखापदे रक्तां कवचं पार्श्वयोः स्थितम् ॥ ११२ ॥

नेत्रेषु श्यामलं नेत्रं करेऽस्त्रमसितं स्मरेत् ।
चतुर्भुजास्त्रिनेत्राश्च जटामुकुटमण्डिताः ॥ ११३ ॥

वराभये कपालं च शूलं च दधतः करैः ।
अङ्गदेवाः स्मृताः सौम्या नेत्राग्रे तूम्रविग्रहे ॥ ११४ ॥

त्रिशूलं त्रिगुणं प्राहुः पशुः सत्यनिष्ठितः ।
खड्गः प्रतापो वज्रं तु शंभोः शक्तिरमेयता ॥ ११५ ॥

बहिः संहारिणीशक्तिः शक्तर्नागेप्रधृष्यता ।
मलमायाकर्मनाशो घण्टानादस्वरूपिणी ॥ ११६ ॥

अभयं पाल्निी शक्तिर्विवर्णं त्वङ्कुशं विदुः ।
एवं दशभुजश्चिन्त्यो दिव्यैर्दशभिरायुधैः ॥ ११७ ॥

अकपाले तु मन्त्रस्य ध्येयो देवश्चतुर्भुजः ।
वराभयपरश्वेण लसत्करसरोरुहः ॥ ११८ ॥

वक्त्रेष्वीशानवक्त्रं यदूर्ध्वं चाभिमुखं सदा ।
पूजाकालेषु तत्पूजाद्वाराभिमुखतां व्रजेत् ॥ ११९ ॥

पुरुषाघोरसद्याख्यवामदेवाननानि तु ।
द्वारभेदान्न भेदन्ते स्वस्वस्थानव्यवस्थया ॥ १२० ॥

अथवा मण्डपद्वारदिगादिपरितः क्रमात् ।
चत्वार्येतानि वक्त्राणि प्रादक्षिण्यैः प्रकल्पयेत् ॥ १२१ ॥

एवं सदाशिवं ध्यात्वा निश्चलेनान्तरात्मना ।
मन्त्रं न्यासादिकं चापि कृत्वा स्वस्य तनौ यथा ॥ १२२ ॥

मूर्तित्वेनैव सङ्कल्प्य शिवस्य परमात्मनः ।
अभ्यर्च्य गन्धपुष्पाद्यैः मनसैवोपपादितैः ॥ १२३ ॥

तस्यां मूर्तौ मूर्तिमन्तं शिवं सदसतः परम् ।
प्राणस्थानं सदेशस्थं चिन्तयेदम्बया सह ॥ १२४ ॥

ब्रह्मा विष्णुश्च रुद्रश्च तथान्ये च सुरासुराः ।
तपोभिरुग्रैरप्यापि यस्य दर्शनकांक्षिणः ॥ १२५ ॥

यस्मात्सर्वमिदं ब्रह्मविष्णुरुद्रेन्द्रपूर्वकम् ।
सह सर्वेन्द्रियैः सर्वं प्रथमं संप्रसूयते ॥ १२६ ॥

कारणानां च यो धाता ध्याता परमकारणम् ।
न संप्रसूयतेऽन्यस्मात् कुतश्चन कदाचन ॥ १२७ ॥

सर्वैश्वर्येण सम्पूर्णो नाम्ना सर्वेश्वरः स्वयम् ।
सर्वैर्मुमुक्षुभिर्ध्येयः शंभुराकाशमध्यगः ॥ १२८ ॥

सर्वोपरिकृतं वासः सर्ववासश्च शाश्वतः ।
षड्विधाध्वमयस्यास्य सर्वस्य जगतः पतिः ॥ १२९ ॥

उत्तरोत्तरभूतानामुत्तरश्च निरुत्तरः ।
अनन्तमहिमाम्भोधिरपरिच्छिन्नवैभवः ॥ १३० ॥

अशेषविषयामोघशुद्धबुद्धिविजृम्भणः ।
आत्मशक्त्यमृतास्वादप्रमोदरसलालसः ॥ १३१ ॥

अनन्तानन्दसन्दोहमकरन्दमधुव्रतः ।
अखण्डजगदण्डानां पिण्डीकरणपण्डितः ॥ १३२ ॥

औदार्यवीर्यगाम्भीर्यमाधुर्यमकरालयः ।
अतुलः सर्वभूतानां राजराजो महेश्वरः ॥ १३३ ॥

अप्राकृतशरीरं तदतिमन्मथरूपिणः ।
धृतरीतिघनीभूतसच्चिदानन्दविग्रहम् ॥ १३४ ॥

सर्वलक्षणसम्पन्नसर्वावयवशोभितम् ।
सर्वातिशयसंयुक्तं सर्वाभरणभूषितम् ॥ १३५ ॥

रक्तास्यपाणिचरणं कुन्दमन्दस्मिताननम् ।
शुद्धस्फटिकसंकाशं फुल्लपद्मनिभेक्षणम् ॥ १३६ ॥

In Public domain. Digitization Muthulakshmi Research Academy

चतुर्भुजमुदाराङ्गं चारुचन्द्रकलाधरम् ।
वरदाभयहस्तं च मृगटंकधरं हरम् ॥ १३७ ॥

सर्वकल्याणनिलयं चारुनीलालकान्तरम् ।
सर्वोपमानरहितं सर्वात्मानं विचिन्तयेत् ॥ १३८ ॥

ततः सञ्चिन्तयेत्तस्य वामभागे महेश्वरीम् ।
उत्फुल्लपद्मपत्राभां विस्तीर्णायतलोचनाम् ॥ १३९ ॥

पूर्णचन्द्राभवदनां नीलकुञ्चितमूर्धजाम् ।
नीलोत्पलदलप्रख्यां चन्द्रार्धकृतशेखराम् ॥ १४० ॥

अतिवृत्तघनोत्तुङ्गस्निग्धपीनपयोधराम् ।
तनुमध्यां पृथुश्रोणीं पीतसूक्ष्मतराम्बराम् ॥ १४१ ॥

सर्वाभरणसम्पन्नां ललाटतिलकोज्वलाम् ।
विचित्रपुष्पसंकीर्णकेशभारोपशोभिताम् ॥ १४२ ॥

सर्वतोनुगुणाकारां किञ्चिल्लज्जाननाननाम् ।
हेमारविन्दं विलसद्दधानां दक्षिणे करे ॥ १४३ ॥

दण्डवच्चापरं हस्तं न्यस्यासीनां सुखासने ।
पाशविच्छेदनीं साक्षात्सच्चिदानन्दरूपिणीम् ॥ १४४ ॥

सदाशिवेश्वरहरश्रीशद्रुहिणमातरम् ।
समस्तगौरीलक्ष्म्यादिशक्तिचक्रस्य नायिकाम् ॥ १४५ ॥

एवं देवं च देवीं च ध्यात्वा तरुणविग्रहौ ।
सर्वोपचारवद्भक्त्या भावपुष्पैः समर्चयेत् ॥ १४६ ॥

इत्याकलय्य शास्त्राणि शैवानि विविधानि च ।
उद्धृत्य तेभ्यः सारांशं संगृहीता यथामति ।
श्रीपतिर्ध्येयपादाब्जश्रीशिवध्यानपद्धतिः ॥ १४७ ॥

श्रीरस्तु

(No. 2839.)

॥ विधिलयपरित्राणम् ॥

Substance, Palm-leaf, Size, 17 × 1½ inches, Folios 70, Lines 4 to on a page, Character, Grantha and Telugu, Condition Good, Complete.

अयं विधिलयपरित्राणनामा ग्रन्थः सुप्रसिद्धवैदुष्यैः विश्वगुणादर्शादिग्रन्थभूमि श्रीवेङ्कटाध्वरिभिः प्रणीतः । इमान् पण्डितपवरानधिकृत्याजानन्तः संस्कृतज्ञा न सन्त्येवेति सुनिश्चितमपि वक्तुं पार्यते । त इमे न केवलं महाकवयः, अपितु तर्कव्याकरणादि कर्कशशास्त्रेष्वपि निरूपमपाण्डित्यशालिन इतीमं विषयं "तत्सुतस्तर्कवेदान्ततन्त्रव्याकृति चिन्तकः" इति स्वकीयवाक्यान्वर्थतायां दृढतरप्रमाणभूतैरेतादृशैर्विधिलयपरित्राणादिभि प्रबन्धैरवगच्छामः । विशिष्य मीमांसाशास्त्रे एभिस्त्रिचतुरा ग्रन्था निर्मिता इति श्रूयते परन्त्वधुना अयं, मीमांसामकरन्दश्चेत्युभावेव ग्रन्थावुपलभ्येते । तत्र विद्यमानकोशागारे मीमांसामकरन्दस्य परिपूर्ण आदर्शः मृग्य एव । विधिलयपरित्राणस्यापि तज्ज्ञापुरादिसर्व नैकोप्यादर्शः समुलभ्यते । मद्रपुरीयप्राच्यग्रन्थकोशागारे (Government Orient Manuscripts Library, Madras) परमेक आदर्शोऽस्ति । परं तु सः असमग्रः

एवं स्थिते दैवादस्मदीये श्रीवेङ्कटेश्वरप्राच्यविद्याविमर्शशालासम्बन्धिनि कोशाग (Sri Venkateswara Oriental Institute Library) अस्य पञ्चमातृकास्सम्पा रक्ष्यन्ते । तासु इयमेकैव 2839 मातृका संपूर्णा । अयं कोशः काञ्चीमण्ड मण्डनायमानमहामहोपाध्यायश्रीकृष्णतातार्याणां गृहे स्थितः, तदीयश्च । वावदूकाग्रगण्य श्री V. V. श्रीनिवासय्यंगार् द्वारा लब्धः । आप्रथमपरिच्छेदसमाप्ति ग्रन्थाक्षरैरनन्तरमान्त्र मान्ध्राक्षरैश्च लिखितोऽस्ति ।

एतत्प्रबन्धकर्तृन् एतदीयकाव्यनाटकादिग्रन्थांश्चाधिकृत्य वक्तव्यास्सर्वे विषय कीर्तिशेषैः श्री डाक्टर् एम् कृष्णमाचार्यैःस्वीये संस्कृतग्रन्थजातचरिते (Classical Sanskrit Literature para 529) निरूपिता इति तत्रैव सर्वं द्रष्टव्यम् ।

In Public domain. Digitization Muthulakshmi Research Academy